CALCUTTA SANSKRIT COLLEGE RESEARCH SERIES NO. XVII

Published under the auspices of the
Government of West Bengal.

TEXT NO. 11

आचार्यशंकरकृतम्

# आत्मबोधप्रकरणम्

(सटीकम्)

SANSKRIT COLLEGE
CALCUTTA
1961

MUNSHI RAM MANOHAR LAL
Oriental & Foreign Book-Sellers,
P. B. 1165, Nai Sarak, DELHI-6.

CALCUTTA SANSKRIT COLLEGE RESEARCH SERIES

*Board of Editors :*

Dr Radhagobinda Basak, M.A., Ph. D., *Chairman.*
Dr Suniti Kumar Chatterjee, M.A., D.Litt., (Lond.)
Professor Durgamohan Bhattacharyya, M.A., Kāvya-Sāṃkhya-Purāṇa-tirtha,
Professor Ananta Kumar Bhattacharyya, Nyāya-Tarka-tīrtha.
Dr Gaurinath Sastri, M.A., D.Litt., *Secretary* and *General Editor.*

I-SAN-171

CALCUTTA SANSKRIT COLLEGE RESEARCH SERIES NO. XVII

# ĀTMABODHAPRAKARAṆA

## OF

## ŚAṄKARĀCĀRYA

with a commentary ascribed to Madhusūdana Sarasvatī

Edited with an introduction and notes by

DINESH CHANDRA BHAṬṬACHARYA, Śāstrī, Tarka-Vedānta-tīrtha.
*Editor, Publication Branch, Department of Post-graduate Training and Research, Sanskrit College, Calcutta.*

SANSKRIT COLLEGE
CALCUṬTA
1961

Published by
The Principal, Sanskrit College,
1, Bankim Chatterjee Street,
Calcutta-12

Price: Indian, Rs. 5·00; English, 8s. 3d.

Printed by
S. Mukherjee, Superintendent,
Government Printing, West Bengal,
Government Press, Alipore, Calcutta-27

1564046 Sankarācārya

कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला—ग्रन्थाङ्कः १७

श्रीशंकराचार्यकृतम्

# आत्मबोधप्रकरणम्

(सटीकम्)

यथापेक्षितभूमिकाटिप्पन्यादियोजनया राष्ट्रीयसंस्कृतमहाविद्यालयस्थगवेषणा-
विभागीयग्रन्थप्रकाशनविभागस्य सम्पादकेन तर्कवेदान्ततीर्थोपाधिकेन

श्रीदीनेशचन्द्रभट्टाचार्यशास्त्रिणा

सम्पादितम् ।

कलिकाता संस्कृत कलेज
शकाब्दाः १८८३

B
132
.V3
S350
1961

TABLE OF CONTENTS

| | Page |
|---|---|
| Foreword | ix |
| Preface | xi |
| Introduction | xiii |
| Manuscript Materials | xvii |
| Text | 1-20 |

# FOREWORD

Pandit Dinesh Chandra Sastri of our Publication Department discovered sometime ago a hitherto unpublished commentary on the Ātmabodha-prakaraṇa of Śaṅkarācārya in the collection of manuscripts of our College Library. Later on he availed himself of the opportunity of comparing it with another manuscript from the India Office Library, London. Though it is not possible for us to identify this commentary as the work of Madhusūdana Sarasvatī, still its usefulness as a lucid exposition of the text will be admitted by the academic world.

GAURINATH SASTRI

# PREFACE

It is known from various sources that Madhusūdana Sarasvatī, the redoubtable Bengali Advaitin of the sixteenth century, wrote a oommentary on the *Ātmabodha* of Śaṅkarācārya. Professor Aufrecht who mentions a commentary of the *Ātmabodha* by Madhusūdana, also gives us the information of a manuscript belonging to the Royal Asiatic Society of Great Britain and Ireland. This is described in the catalogue of South Indian Sanskrit Manuscripts (Wish collection) by Dr. M. Winternitz. The description in the Wish Collection runs as follows :—

Wish No. 32....23 leaves....8 lines a page. A commentary on Śaṅkarācārya's *Ātmabodha-prakaraṇa* (by Madhusūdana Sarasvatī, according to Professor Aufrecht).

The beginning and the end of the manuscript tally with those of the manuscript found by us in the library of Government Sanskrit College, Calcutta. The publication of this small treatise is mainly based on that manuscript, though for the purpose of determining correct readings much help was secured from the microfilm copy of a manuscript, which I was able later on to obtain from the India Office Library, London. The Sanskrit College manuscript (SM) is written in clear Bengali script, whereas the India office manuscript (IM) is written in Devanāgari script. Both the manuscripts contain mistakes. At some places, the readings in both do not give us any intelligent meaning at all. So, at many places appropriate words have been added or substituted. The variants in the IM have been generally given in the footnotes, though in some cases its readings have been selected in the main text. Though the manuscripts contain the same commentary, the India Office manuscript bears the title '*Ātmabodhaprakaraṇaṭīkā*' while the Sanskrit College manuscript describes it as '*Ātmabodhaṭīkā*'. It is important that in neither of them the ascribed author Madhusūdana has been mentioned in the colophon. This gives rise to the doubt as to the authorship of this commentary—whether it is the commentary which is traditionally ascribed to the renowned Madhusūdana.

Though Professor Aufrecht ascribes the authorship of this very commentary to Madhusūdana, and though the absence of the author's name in the colophon may be explained away, it is very difficult to accept this commentary as Madhusūdana's judging from the character of its style and contents. Compared with the "*Siddhāntabindu*" the famous commentary of Madhusūdana on the *Daśa-ślokī* of Śaṅkarācārya, it must be admitted that this commentary is a much inferior product, lacking the grandeur of dialectical acumen natural to Madhusūdana. However, it is a new useful commentary which will enable the reader to understand the text.

D. C. SASTRI

# INTRODUCTION

*Ātmabodha* is one of the short treatises on Advaita Vedānta, the authorship of which is ascribed to the great philosopher and saint of India—Ācārya Śaṅkara. It contains only sixty-eight verses on his non-dualistic philosophy. The verses, though easy in form, are pregnant with metaphysical and spiritual meaning. The verses have been explained in a commentary ascribed to Madhusūdana Sarasvatī, a towering Vedāntist of the sixteenth century. Madhusūdana commented also on some other short works of Śaṅkara and one such is the commentary on the *Daśa-ślokī,* which is known by the name of *Siddhānta-bindu.* The present commentary is only a lucid explanation of the verses unveiling the implications of the non-dualistic philosophy of Śaṅkara. Context and relevancy of each śloka have been clearly stated, as *ṭīkās* are expected to do. Relevant Upaniṣadic texts have been quoted in the commentary in support of the views upheld. Important monistic conclusions have, also, been noticed in course of explaining the verses, which describe the glory of the Self as the Ultimate Reality, and that of self-realisation.

In order to determine the authenticity of Ātmabodha as one of the works of Śaṅkara, we are to depend on the internal evidences of Śaṅkara's inimitable style and the wealth of its contents. Another fact to be considered in this context is that this work has been commented on by several commentators, Madhusūdana, Ramānandatīrtha, Advayānanda, Bodhendra and Krisṇānanda.

Dr Belvalkar in his classification of Śaṅkara's works* as of genuine authorship, of doubtful authorship and spurious, has placed Ātmabodha in the list of works of undoubted authorship of Śaṅkara, even though he rejects a good many of Śaṅkara's prakaraṇa and stotra-works as doubtful or spurious.

### Non-dualistic Philosophy in *Ātmabodha* and *Ātmabodhaṭīkā.*
### (In order of the text)

**Viṣaya, adhikārī and prayojana**

In a work of philosophical interest, we find statements of the subject-matter (*viṣaya*), the purpose (*prayojana*) and the conditions of fitness for the attainment of the end through the study of the work; all these have been indicated in the first verse of the text and developed in the tīkā. Realisation (direct experience) of the self is the *subject-matter* of the work. It has been instructed for those who have acquired *fitness* through the performance of various prescribed duties (i. e. nitya and naimittika) and austerities, and thereby achieved an equanamity of the mind, who have discarded all enjoyments in this life and hereafter due to yearning

*See page 226, Shri Gopal Basu Mallick Lectures (1925) on Vedanta Philosophy (Poona ed.)

for liberation (i. e. इहामुत्रफलभोगविराग and मुमुक्षुत्व). Such an aspirant is the fit person (adhikārī). It has also been indicated that liberation or *mokṣa* is the 'end' or *purpose*. Only the fit aspirant can achieve this end through proper means as prescribed in the treatise.

The chief and direct means of the final liberation is knowledge or realisation, as, it is only knowledge that can remove nescience (ignorance), the root of all evils and bondage. Karman *e.g.* Vedic rites and rituals, chantings and austerities are remote means only, as they cannot destroy ignorance, which is not antagonistic to it.

Nature of the Self

The Self is the only one reality without a second, without any limitation or attribute. It appears as limited and many due to nescience. Like the forms of ornaments superimposed on gold, all objects are superimposed on the Self which is of the nature of pure existence and consciousness. Or, like the sky which seems to be different due to different adjuncts, the Self also seems to possess different names, castes and status superimposed on it due to different adjuncts which are themselves projections of nescience. They are false like the bubbles of water.

Adjuncts of the Self

The adjuncts are of three kinds—gross, subtle and causal. This physical body which is the field for enjoyment and is made of five elements (viz., earth, water, fire, air and sky) is the gross adjunct. The subtle adjunct of the Self is the subtle body made of the subtle elements, with seventeen parts—the ten organs, the five vital forces, the mind (*manas*) and the intellect (*buddhi*). It is the instrument for various enjoyments. Nescience or ignorance is neither real i.e. existent, as it is sublated by knowledge, nor is it non-existent, as it is perceived to exist and veil the reality. Nescience which is beginning-less and inscrutable (i. e. indefinable either as existent or as non-existent), is the causal adjunct, of which the subtle and gross adjuncts are projections. But the Self is quite distinct from all these adjuncts. The purity and oneness of the Self is neither disturbed by the existence of nescience nor its projections, as they, being of indefinable (*anirvācya*) and superimposed (kalpita) nature, cannot be regarded as different existents to disturb the oneness of the reality—the Self.

The five *Koṣas*

These three kinds of adjuncts of the Self, gross, subtle and causal are the five sheaths (*koṣas*), divided in another way. The gross body is the *annamaya koṣa*. The subtle body contains three *koṣas*—the *prāṇamaya*, the *manomaya* and the *vijñānamaya*. The causal body constituted of nescience, is the *ānandamayakoṣa*. The pure Self when falsely identified with them appears to be actually pervaded by them. So the pure Self should be carefully discriminated from the five *koṣas*.

The intellect, the mind and the different sense-organs seem to be conscious through the consciousness of the Self which reveals everything. Brahmā, Indra



and others who are known to possess extreme happiness, are also such as they possess a fraction of the infinite bliss of the Self. Neither the sun, the moon and the stars, nor the sense-organs can reveal the Self, which, on the contrary reveals all of them. They are thought to be revealing only through the revelation of the Self which alone shines.

Nature of the Self

Desire, attachment, pleasure, pain, etc. exist in our mental states and cease to exist when the mind is dissolved as in deep sleep. So, they pertain to the mind and not to the Self.

The divisions into the knower, the knowledge and the known are also not real in the Self, but superimposed. Whatever appears as different from the Self is false like a mirage. Whatever is seen or heard as something other than the Self, is essentially the Self.

Epistemology of Self-realisation

If the Self is pure and immutable, and the mind is matter (*jaḍa*) how is it possible that we say: I am knowing? It has been possible only through a false identification of Self-consciousness with the modes of the mind. As a result of this false identification, the Self appears as the knower and the doer, and thinks itself to be a *jīva*, i.e. an individual, with limitations. When Self-realisation dawns, the Self knows that it is not a *jīva* and becomes fearless. This realisation, which also involves a mental state does not militate against the reality of oneness of the self, because, after sublating nescience and all its projections, the cognition also disappears, for it is also a projection of nescience. The essence of the realisation is the Self itself. It does not require any other consciousness to reveal or illumine it. The Self is self-luminous or *svaprakāśa*.

Self realisation

Though the Self is omnipotent it is not perceived everywhere. It shines only in the intellect being reflected in it, when we can know it as the witness and illuminer of the mind. All actions, attributes, forms and changes being revealed (*dṛśya*) by the Self, cannot pertain to it—the revealer. In the final realisation the Self is known as one with Brahman—pure existence, consciousness and bliss.

Means of realisation.

In order to achieve such realisation we are to think and meditate on that real nature of ours and thereby remove ignorance and its projections. The aspirant should control his senses, leave all attachments, and being seated in a lonely place meditate on that infinite self with one-pointed devotion. By the purified intellect he should dissolve the visible universe in the Self and think of the Self as the clear sky. Withdrawing his mind from all sense-objects he should rest in the infinite bliss which is the Self. The aspirant should always meditate on the nature of the Self which has been described in the Upaniṣads by negative terms in excluding everything that appears as non-self. 'It is not that, it is not that',

'it is neither gross nor subtle,' etc. are the expressions which can possibly point to the real nature of the Self, all positive expressions being incapable of reaching the same.

Self realisation

As *jīva*-hood (individuality) is superimposed on the Self through error, it ceases when the essential nature of the Self is realised and ignorance is removed. Then the Self shines in its true self-luminous glory and Brahman-hood is achieved. In fact, the Self or Brahman-hood is ever-achieved. It only seems to be unachieved through ignorance, like a necklace placed round the neck but forgotten. Again, when ignorance is destroyed by realising the identity of the *jīva* with the Self through the great teachings of the Upaniṣads—'Thou art That,' 'I am Brahman', etc., the already achieved Brahman-hood seems to be achieved anew, just like the forgotten necklace secured, as it were, when someone points it out.

Jivanmukti

When the *yogin* realises that everything is the Self, he is *jīvanmukta*—he is freed from all disturbances of attachment and hatred and lives in constant peace. Though he is still in the midst of adjuncts like the body, the sense organs, etc., he moves freely unaffected by their changes and attributes. There is no other achivement, no other bliss and no other knowledge greater or higher than this. His realisation leads to eternal life and omniscience. He requires no other performance of rites or duties, no other pilgrimage than this, the holiest pilgrimage to the Self.

Parāmukti or the final liberation

When his *prārabdhakarman* i.e., the particular traces of previous actions for the fruition of which this life was determined, is exhausted, and all his adjuncts are dissolved, the *jīvanmukta* enters into the supreme attributeless Being and becomes one with it. This is the final liberation—*parā mukti*—the *summum bonum.*

## MANUSCRIPT MATERIALS

SM.—This manuscript preserved in the Sanskrit College Library, Calcutta is written in clear Bengali script on machine-made paper. It contains 17 folia (34 pages) of $10\frac{3}{4}'' \times 4''$ size, each page containing 6 lines. It contains only the commentary entitled आत्मबोधटीका without the text of the *Ātmabodha*. No name of the author or the scribe is mentioned anywhere. It is full of misreadings and omissions.

IM.—This is a microfilm copy of the manuscript deposited in the India Office Library, London. The manuscript its numbered as—Sanskrit 2296. Egg 2296, I.O. 2011a, and bears the title आत्मबोधप्रकरणं सटीकम्. It contains both the text and the commentary of the *Ātmabodha*. It is complete in 16 folia with 10 to 12 lines on each page. It is written in Devanagari script without any mention of date, author or scribe. But a colophon with Śaṅkarācārya's name as the author of the *Ātmabodha* appears at the end.

आचार्यशङ्करकृतम्

# आत्मबोधप्रकरणम्

(सटीकम्)

# आत्मबोधः[1]

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम्।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥ १ ॥

आत्मबोधटीका[2]।

ओं नमो दुर्गायै[3]। तत्र[4] भगवान् शंकराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं[5] निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहाय वेदान्तसिद्धान्तसंग्रहमात्मबोधाख्यप्रकरणं दिदर्शयिषुः[6] प्रतिजानीते—'तपोभि'रिति। कृच्छ्रचान्द्रायणनित्यनैमित्तिका[7]नुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागाद्यन्तःकरणदोषा येषां तेषां, नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति वचनात्[8]। अत एव शान्तानामक्षोभिताशयानां, वीतरागिणामिहामुत्रफलभोगेच्छा[9]रहितानां मुमुक्षूणां संसारग्रन्थिभेदने विततप्रयतात्मनां[10] यथोक्तसाधनसम्पन्नानामयमात्मबोधो विधीयते विधिमुखेनावश्यकतया प्रतिपाद्यते इत्यर्थः ॥ १ ॥

---

बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥ २ ॥

ननु तपोयोगमन्त्रकर्मयागाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोध एव किमिति प्राधान्येन उच्यते इत्यत[11] आह—'बोधोऽन्ये'ति। तपोयोगमन्त्रकर्मयागादीनि[12] साधनाणि परम्पराक्रमेण[13] ज्ञानद्वारा मोक्षं साधयन्ति, ज्ञानन्तु स्वजन्ममात्रादेवाज्ञानं निःशेषं नाशयित्वा मुमुक्षुं स्वाराज्येऽभिषेचयति, अतोऽन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तम्। तदेव दृष्टान्तेन द्रढयति[14]'—पाकस्येति। यथा लोके पचनक्रिया[15] काष्ठजलभाण्डादिसाधनेषु सत्स्वपि वह्निं विना न[16] सिध्यति तद्वत् ज्ञानं विना मोक्षो न सिध्यतीत्यर्थ ॥ २ ॥

---

[1]1M reads आत्मबोधप्रकरणम्. [2]1M reads अथ आत्मबोधप्रकरणटीकाप्रारम्भः.

[3]1M begins with श्रीमार्तण्डो जयतु, and a verse—शतमखपूजितपादं शतपथमनसोप्यगोचराकारं। विकसितजलरुहनेत्रं सीताछायांकमाश्रये रामम् ॥ [4]1M—इह

[5]The upaniṣads, the Gīta and the Brahmasūtras are called the three prasthānas, on which Saṅkara wrote commentaries. 1M omits from वेदान्तप्रस्थानत्रयं upto अनुग्रहाय.

[6]IM—निर्दिद° [7]1M—काद्यनु°.

[8]This portion of the verse is found quoted by the different commentators.

[9]1M—भोगरहितानां [10]1M—कृतप्रयत्नानां [11]1M—तत्राह बोध इति

[12]1M reads तपोमन्त्रकर्मयोगादिसाधनानि [13]1M reads परम्परया क्रमेण

[14]1M reads स्पष्टयति. [15]SM reads पचनक्रियायां [16]SM reads तन्न.

*1M=India office manusoript. SM=Calcutta Sanskrit Collegə manuscript.

अविरोधितया कर्म नाविद्यां विनिवर्तयेत्।
विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ॥ ३ ॥

ननु कर्मणां विचित्रशक्तित्वात् कर्मैवाज्ञानं[1] नाशयिष्यति किमात्मज्ञानेनेत्याशंक्याह[2]—'अविरोधितये'ति स्पष्टार्थः ॥ ३ ॥

---

परिच्छिन्न[3] इवाज्ञानात्तन्नाशे सति केवलः।
स्वयं प्रकाशते ह्यात्मा मेघापायेऽंशुमानिव ॥ ४ ॥

ननु प्रतिशरीरमात्मा परिच्छिन्न इवो[4]पलभ्यते कथं कैवल्य[5]मित्याह 'परिच्छिन्न' इति। परिपूर्णस्याद्वितीयस्यात्मनोऽज्ञानविकल्पितोच्चावचशरीराध्यासकृतपरिच्छिन्नत्वमेव न तु तत्त्वदृष्ट्या, अतो विवेकेनाविवेकहानात्[6] आत्मा केवल एव प्रकाशते मेघावरणाभावे भानुवदित्यर्थः ॥ ४ ॥

---

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम्।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ५ ॥

नन्वात्मज्ञाना[7]दद्वैतसिद्धिरयुक्ता वृत्ति[8]ज्ञानेन द्वैतसिद्धेरित्यत आह—'अज्ञानकलुषमिति'। अज्ञानकार्यभूतैरहंकारादिभिः[9] कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभिमानिनं[10] जीवं, ज्ञानं[11] चिरकालाभ्यासादज्ञानहानद्वारा तत्कार्यान्तःकरणादिकमशेषतो[12] नाशयित्वा स्वयमपि[13] नश्यत्यज्ञानकार्यत्वाद्वृत्तेः तत्[14]प्रतिबिम्बितं ज्ञानमात्माभासत्वादात्मन्येव[15] एकीभवति; तदानीमद्वय एवात्मा प्रकाशते, यथा कतकरेणुरखिलं जलं निर्मलं कृत्वा स्वयमपि[16] नश्यति तद्वदित्यर्थः ॥ ५ ॥

---

[1] 1M reads कर्मेव किञ्चिदज्ञानं.

[2] 1M reads ..त्याशंक्य कर्माज्ञानयोर्विरोधाभावान्नैवमित्याह—अविरोधीति। कर्मणोऽविद्याविरोधित्वाभावादज्ञानं नाशयितुं नोत्सहते विद्यायाः प्रकाशरूपत्वादंधं तमस्तेजपुञ्जमिव नाशयितुं समर्थ इत्यर्थः.

[3] Vanivilas edition reads अवच्छिन्न.    [4] 1M reads एव for इव.

[5] 1M reads कथमस्य केवलत्वमित्यत्राह.

[6] SM reads विवेकाविववेकहानात् which is evidently a misreading. 1M reads विवेकज्ञानात्.

[7] 1M reads आत्मनोऽद्वैतज्ञानाद°.    [8] 1M omits वृत्ति.    [9] 1M reads ..रहमादिभिः.

[10] 1M omits भोक्तृत्व.    [11] 1M reads ज्ञानंकर्तृ.    [12] 1M reads निःशेषं.

[13] 1M reads एव for अपि.    [14] 1M reads तत्र for तत्.    [15] 1M reads आत्मनैव.

[16] 1M reads एव for अपि.



संसारो स्वप्नतुल्यो हि रागद्वेषादिसंकुलः।
स्वकाले सत्यवद्भाति प्रबोधे सत्यसन्भवेत् ॥ ६ ॥

नन्वपरोक्षतयानुभूयमानस्य संसारस्य कथमत्यन्तासत्त्वं प्रत्यक्षविरूद्धमित्याशंक्य स्वप्नदृष्टान्तेन तस्य[1] मिथ्यात्वं साधयति—'संसार' इति। रागद्वेषादिभिः संसारः[2] संकुलायमानः, स्वकाले[3] स्वस्य कारणभूताज्ञाने स्थिते सति तावन्मिथ्याभूतोऽपि संसारः सन्नेवावभाति[4], प्रबोधे सति वाक्यार्थ[5]श्रवणादात्मज्ञानोत्पत्तौ असन्नेव[6] भवति। अत्र[7] दृष्टान्तः स्वप्नतुल्य इति। स्वप्नोऽपि[8] यावन्निद्रानुभूयते तावन्मिथ्याभूतोऽपि सत्य इव[9] भाति, प्रबोधे निद्रानाशे सति स्वप्नो मिथ्या भवति, तद्वत् संसार इत्यर्थः[10] ॥ ६ ॥

---

तावत् सत्यं जगद्भाति शुक्तिकारजतं यथा।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ॥ ७ ॥

जगन्मिथ्यात्वं[11] दृष्टान्तेन द्रढयति—'ताव'दिति। यथा यावन्नीलपृष्ठत्रिकोणादिविशेषज्ञानं नोत्पद्यते तावद्रजतज्ञानं सत्यमिवानुभूयते,[12] तथा सर्वाधिष्ठानभूतं सच्चिदानन्दाद्वयं ब्रह्म यावन्न ज्ञायते साक्षान्नानुभूयते[13] तावज्जगदाकारेण परिणतः संसारः सत्य[14] इव भ्रान्त्या दृश्यते इत्यर्थः ॥७॥

---

उपादानेऽखिलाधारे जगन्ति परमेश्वरे।
सर्गस्थितिलयान् यान्ति बुद्बुदानीव वारिणि[15] ॥ ८ ॥

---

[1] 1M reads अस्य for तस्य.    [2] 1M reads संसारः after संकुलायमानः.

[3] 1M reads स्वप्नवत् after स्वकाले.    [4] 1M reads सत्यवद्भाति.

[5] 1M omits अर्थ.

[6] 1M reads सत्यामसदिव after ज्ञानोत्पत्तौ which is evidently a mis-reading.

[7] 1M reads तत्र for अत्र.    [8] 1M reads स्वप्नोहि.

[9] 1M reads इवाभाति.

[10] 1M omits from सति upto इत्यर्थः and reads मिथ्या तद्वदित्यर्थः after निद्रानाशे.

[11] 1M reads जगन्मिथ्यात्वमेव दृष्टान्तान्तरेण.

[12] 1M reads सत्यमेव.    [13] 1M omits from तथा upto नानुभूयते.

[14] 1M reads स इव.

[15] This verse is numbered as the eighth in Vanivilas and other editions of Atmabodha. But none of our manuscripts (SM and 1M) contains the verse or any commentary on it. So, it seems that some manuscripts of Atmabodha did not include this verse, and counted the next verse as eighth and so on. We, however, include the verse though without any commentary, and number the verses accordingly.

सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः।
व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ ९ ॥

सर्वं दृश्यं प्रपञ्चजातं ब्रह्मण्येव मायया[1] कल्पितमिति प्रतिपादयति—'सच्चिदात्मनी'ति। सत्यज्ञानानन्दात्मनि नित्ये सर्वानुस्यूते[2] व्यापके ब्रह्मणि सर्वा व्यक्तयो[3] देवतिर्यङ्नरस्थावरजङ्गमादयोऽपि विविधा अपि व्यक्तयः सर्वोपादानभूते परमेश्वरे हाटके[4] हेम्नि कटकमुकुटादय इव कल्पिता एव, ब्रह्मणोऽभिन्ना इत्यर्थः ॥ ९ ॥[5]

---

यथाकाशो हृषीकेशो नानोपाधिगतो विभुः।
तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत् ॥ १० ॥

उक्तमर्थमाकाशदृष्टान्तेन द्रढयति—'यथाकाश' इति ॥ हृषीकेशो मनःप्रभृतिसर्वेन्द्रियप्रवर्तको[6] नियामको वा, विभुः सर्वगतः परमेश्वरः स्वमायाकल्पित[7]नानाविधोपाधिषु प्रतिबिम्बितः सन्नानेव भाति[8], तन्नाशे सति ब्रह्मात्मैक्यज्ञानेन तेषां मायापरिकल्पितानां नाशात्[9] केवल एव भाति, यथाकाशो नानोपाधिवशान्नानेव भाति उपाधिलयादेक[10] एव भाति तद्वदित्यर्थं ॥ १० ॥

---

नानोपाधिवशादेव जातिनामाश्रमादयः।
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ ११ ॥

ननु सर्वदेहेषु[11] तत्तज्जात्यादिभिरनुविद्धस्य कथं नित्यत्वमुच्यते तत्राह—'नानोपाधी'ति। पूर्वोक्तनानोपाधिवशादेवात्मनि जातिनामाश्रमादय[12] आरोपिता मायापरिकल्पिता न तु स्वतः[13], यथा स्वभावमधुरं जलं कटुकषायाम्लरक्तपीतादिद्रव्योपेतं सत् तद्रूपं भजति[14] न तु स्वरूपत[15]स्तद्वदित्यर्थः ॥११॥

---

पञ्चीकृतमहाभूतसंभवं कर्मसञ्चितम्।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ १२॥

आत्मनोऽविद्यापरिकल्पितोपाधित्रय[16] माह—'पञ्चीकृते'ति। पञ्चानां भूतानां[17] प्रत्येकं द्विधा विभज्य [18]तत्रैकैकमर्धं चतुर्धा समं विभज्य स्वांशं परित्यज्येतरेषु योजनं पञ्चीकरणम्; एवं

[1] 1M reads मायाकल्पितमिति. [2] 1M reads विष्णौ after सर्वानुस्यूते.
[3] 1M omits व्यक्तयो. [4] 1M omits हाटके.
[5] 1M and SM count this verse as '8' and so on. [6] 1M reads प्रकाशकः for प्रवर्तको.
[7] 1M reads स्वमायया कल्पित. [8] 1M reads भवति for भाति.
[9] 1M reads देहाद्युपाधिनां नाशे सति for नाशात्. [10] 1M reads विलयात् for लयात्.
[11] 1M reads सर्वदेहतत्तजात्या°. [12] 1M reads वर्ण instead of नाम.
[13] 1M reads न तत्त्वतः. [14] 1M reads भवति.
[15] 1M reads स्वरूपेण. [16] 1M reads...त्रयमध्ये स्थूलोपाधिमाह — .
[17] 1M reads पञ्चभूतानां. [18] 1M wrongly omits from तत्रै upto विभज्य.



पञ्चीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः सम्भवो यस्य तत् कर्मसंचितं[1] प्रारब्धकर्मभिः सञ्चितं रचितं स्थूलशरीरं सुखदुःखभोगानामायतनं[2] भोगस्थानं प्रत्यगात्मन इति ॥१२॥

---

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥ १३ ॥

सूक्ष्मोपाधिमाह—'पञ्चप्राणे'ति। पञ्चप्राणा एकस्यैव महाप्राणस्य प्राणादयो वृत्तयः, ज्ञानेन्द्रियकर्मेन्द्रियभेदेनेन्द्रियाणि दश, मनःशब्देन संकल्पविकल्पात्मकान्तःकरणवृत्ति[3] बुद्धिर्निश्चयात्मिका, एतैः संयुक्तमपञ्चीकृतसूक्ष्मभूतोत्थं सूक्ष्मभूतेभ्यो जातं सूक्ष्माङ्गं लिङ्गशरीरं सुखदुःखभोगसाधनमित्यर्थः[4] ॥ १३ ॥

---

अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥१४॥

तृतीयं कारणोपाधिमाह—'अनाद्यविद्ये'ति। सदसद्भ्यामनिर्वाच्याऽनादिभूता[5] कारणोपाधिरूच्यते, सा च व्यष्टिसमष्टिभेदेन स्थूलसूक्ष्मप्रपञ्चयोः कारणभूतत्वात् कारणोपाधिरूच्यते। उपाधित्रयकथनप्रयोजनमाह—उपाधित्रितयादन्यमिति। तत्साक्षिणमात्मानमवधारयेज्जानीयादित्यर्थः ॥१४ ॥

---

पञ्चकोषादियोगेन तत्तन्मय इव स्थितः।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १५ ॥

नन्वन्नमयाद्येषु कोषेषु व्याप्य तत्तन्मयतया स्थितस्य कुतो नित्यमुक्तत्व[6]मित्याशङ्क्याह—'पञ्चकोषादी'ति। अन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयाः पञ्चकोषाः, आदिशब्देनाशना[7]दीनां ग्रहणम्, एतैर्योगेन मिथ्यातादात्म्येन तत्तन्मय इव स्थित आत्मा शुद्धो[8] न तु तेषु वस्तुतो रञ्जनाविशिष्टोऽपि।[9] [10]'स वा एष पुरुषोऽन्नरसमय' इत्यादिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिस्थं ब्रह्म सूचयति न तु तत्त्वदृष्ट्या, यथा निर्मलस्फटिको नीलपीतवस्त्रादियोगेन तत्तन्मय इव भाति [11]वस्तुतो नास्ति रञ्जना तद्वदित्यर्थः ॥ १५ ॥

[1] SM reads संस्यूतं. [2] 1M reads सुखदुःखानामायतनं.
[3] SM reads उच्यते after -°वृत्तिः. [4] SM reads उच्यते after साधनम्।
[5] 1M reads अनिर्वचनीया for अनिर्वाच्या. [6] 1M reads नित्यत्वमुच्यते.
[7] 1M reads पिपासादीनां for अशनादीनां. [8] 1M reads शुद्धात्मा for आत्मा शुद्धो.
[9] 1M reads वस्तुषु रञ्जितः for वस्तुतो रञ्जनाविशिष्टोऽपि.
[10] 1M reads वेदेऽपि before स वा. [11] 1M reads वस्तुतोऽपि नास्ति तस्य रञ्जनादि.

वपुस्तुषादिभिः कोषैर्युक्तं युक्त्यवघाततः ।
आत्मानमान्तरं शुद्धं विविञ्च्यात्तण्डुलं यथा ॥१६॥

असङ्गात्मस्वरूपज्ञानविवेचनप्रकारमाह—'वपु'रिति । वपुः स्थूलशरीरं तदिव तुषस्तदादिभिर्युक्तं[1] तण्डुलमिव पञ्चकोषैस्तावत् स्थितमान्तरमात्मानं युक्त्यवघाततः युक्तिरूपावहननात् शुद्धं बिविञ्चयात्[2] विवेकेन जानीयादित्यर्थः[3] ॥ १६ ॥

---

सदा सर्वगतोऽप्यात्मा न सवत्रावभासते[4] ।
बुद्धावेवावभासते स्वच्छेषु[5] प्रतिबिम्बवत् ॥ १७ ॥

नन्वात्मा सर्वगतस्तर्हि किं सर्वत्र सर्वैर्न दृश्यते इत्यत्राह—'सदा सर्वगत' इति । आत्मा सर्वगतोऽपि सर्वत्र व्याप्य[6] स्थितोऽपि जडैर्बहिवृत्तिभिरक्षैर्न प्रकाश्यते[7], रागादिभिरविद्धायां बुद्धावेव प्रकाशते[8] न सर्वत्र, यथा प्रतिबिम्बः स्वच्छेष्वेव दर्पणादिषु दृश्यते नान्यत्र तद्वदित्यर्थः ॥१७॥

---

देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् ।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत् सदा ॥ १८ ॥

देहेष्ववस्थितस्याप्यात्मन औदासीन्यं राजपुरुषदृष्टान्तेनाह—'देहेन्द्रिये'ति । [9]देहेन्द्रियमनोबुद्धि-प्रकृतयः किंभूताः? जडाः परिणामिण्यो दृश्याश्चेति[9] । देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो जडदृश्य-परिणामिभ्यो विलक्षण[10]मात्मानं तद्वृत्तीनां साक्षितया स्थितं, यथा राजा स्वनगरे स्थितो मन्त्रिषु प्रवर्तमानेषु स्वयं साक्षितया तान् पश्यन्[11] तिष्ठति, तद्वदेव जानीयादित्यर्थः ॥ १८ ॥

---

व्यापृतेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकीनाम् ।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ १९ ॥

नन्वात्मनोऽविकारित्वमयुक्तं यतः सर्वदा व्यापारवान् दृश्यते, तत्राह—'व्यापृतेष्व'ति ।

[1]SM and 1M read—पञ्चकोषैस्तावदात्मनि स्थितं वपुः स्थूलशरीरं तुषादिभिर्युक्तं, eto. The logical connection in the verse seems to be a bit difficult. The readings in the commentary of both the Mss. render no meaning. So some words have been inserted in the commentary for the logical connection and meaning.

[2]SM reads शुद्धतण्डुलमिव विविच्यात् जानीयादित्यर्थः.

[3]1M reads here more as—कथमयं स्थूलदेहवदित्यनुमानादिभ्यः कोशेभ्यो भिन्नमात्मानं विविच्य जानीयादित्यर्थः ।

[4]1M reads प्रकाश्यते for अवभासते.

[5]1M reads the second line as—बुद्धावेवात्र दृश्ये न स्थूलेषु प्रतिबिम्बवत्.

[6]1M reads आप्य for व्याप्य.

[7]SM reads प्रकाशते.

[8]1M reads अवभासते for प्रकाशते.

[9]1M omits from देहेन्द्रिय ... ... up to दृश्याश्चेति.

[10]1M reads शुद्धात्मानं for आत्मानं.

[11]SM reads some word like नानुपण्यः which is evidently a misreading.



इन्द्रियादिषु[1] व्यापृतेषु सत्सु आत्मा व्यापारीवाविवेकिनां गुरुशास्त्राद्युपदेशरहितानां दृश्यते न तु तत्त्वदृशाम् । यथा मेघखण्डेषु वायुवशाद् धावत्सु चन्द्रोऽपि धावतीव लोकैर्दृश्यते न तु चन्द्रमा धावति तथा आत्मापीत्यर्थः ॥ १९ ॥

---

आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः ।
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ २० ॥

ननु देहेन्द्रियमनोबुद्धयश्चेतना[2] दृश्यन्ते, किमात्मना, तत्राह—'आत्मचैतन्य'मिति । नित्य-ज्ञानस्वरूपमात्मचैतन्यमाश्रित्य देहेन्द्रियमनोबुद्ध्यादयः स्वकीयार्थेषु स्वविषयेषु[3] वर्तन्ते, यथा प्राणिनः सूर्यप्रकाशमाश्रित्य स्वव्यापारेषु व्यवहरन्ति । [4]अतश्चैतन्यमात्मन एव[4], देहेन्द्रियादयो जड एवेत्यर्थः ॥ २० ॥

---

देहेन्द्रियगुणान् कर्माण्यमले सच्चिदात्मनि ।
अध्यस्यन्त्यविवेकेन गगने नीलतादिवत् ॥ २१ ॥

नन्वहं जातोऽस्मि बाल्यकौमाराद्यवस्थामनुभवामी[5]त्याद्यनवरतमनुभूयमानस्यात्मनः कथम-विकारित्व[6]मित्यत आह—'देहेन्द्रिये'ति । देहेन्द्रियमनोबुद्धिधर्मांश्चतुर्णां सत्त्वादीन् कर्माणि च कर्मेन्द्रियव्यापारान् मिथ्यातादात्म्येन स्थितेऽमलेऽसङ्गरूपे[7] सच्चिदानन्दात्मके परमात्मन्येव एतत्सामीप्याददविवेकतोऽधस्यन्ति यथा गगने नीलतादि । अतस्ते आत्मधर्मा न भवन्ति किन्तु देहादीनामेवेत्यर्थः ॥ २१ ॥

---

अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ।
कल्प्यन्तेऽम्बुगते चन्द्रे चलनादि यथाम्भसः ॥ २२ ॥

ननु कर्तृत्वभोक्तृत्वादिकमात्मनि [8]सदैवानुभूयमानत्वाद् दुर्वारमित्याशंक्य तदपि तथैव मिथ्येत्याह—'अज्ञाना'दिति । [9]अज्ञानान्मानसोपाधे स्तस्यैव कर्तृत्वादयो धर्मा अतत्त्वज्ञानवशादात्मनि कल्प्यन्ते, यथाम्भसश्चलनादिकमम्बुनि प्रतिफलिते [10]चन्द्रेऽविवेकतः कल्प्यते तद्वदित्यर्थः ॥ २२ ॥

[1]1M reads स्वविषयेषु after इन्द्रियादिषु.

[2]1M reads here सचेतनाः किमात्मचैतन्येन. [3]SM omits स्वविषयेषु.

[4]SM omits this portion but reads आत्मचैतन्येन आत्मज्ञानेन देहेन्द्रियादयोऽपि ज्ञानिनः, वस्तुतो ज्ञानमात्मन्येव in its stead.

[5]SM reads पश्यामि° after अनुभवामि. [6]1M reads अविकारित्वमुच्यते°.

[7]1M reads निर्मले for अमले. [8]1M reads अनवरतम् for सदैव.

[9]1M reads अज्ञानवशात् मानसोपाधिरहंकार instead of अज्ञानान्मानसोपाधे.

[10]1M reads चन्द्रमसि for चन्द्रे.

रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते।
सुसुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः॥ २३॥

इच्छाद्वेषसुखदुःखादीन् (आत्मनः) मन्यन्ते वैशेषिकादयः, तन्निराकरोति—'रागेच्छे'ति। रागेच्छादिसुखदुःखप्रयत्नादिकं सर्वं बुद्धेरेव न त्वात्मनः। कथम्? जाग्रत्स्वप्नयोर्बुद्धौ सत्यां रागादि प्रवर्तते, सुसुप्तौ तस्या[1] बुद्धेर्नाशे कारणे लये[2] न प्रवर्तते, तस्मात् बुद्धेरेव धर्मा[3] न त्वात्मन इत्यर्थः॥ २३॥

---

प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता।
स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः॥ २४॥

तर्हि कीदृगात्मस्वभाव[4] इत्याशंक्यात्मस्वभावमुपदिशति—'प्रकाश' इति। यथा प्रकाश एवार्कस्य स्वभावः, तोयस्य शैत्यम्, अग्नेरुष्णता तथात्मनोऽपि सच्चिदानन्दनित्यनिर्मलता स्वभावः स्वरूपमित्यर्थः॥ २४॥

---

आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम्।
संयोज्य चाविवेकेन जानामीति प्रवर्तते॥ २५॥

यद्यविकार्यात्मा तर्हि जानामीति प्रत्ययः कथमित्यपेक्षायामाह—'आत्मन' इति। प्रत्यगात्मनः[5] सच्चिदंशः, अंश इवांश आत्माभासो बुद्धिवृत्तिश्चैतद्द्वयमविवेकेन संयोज्य, [6]यद्यप्यसङ्गस्यात्मनः केनापि संयोगो नास्त्येव तथाप्यज्ञानवशान्मेलनं संभाव्य, जानामीति प्रत्ययोऽहंकारवृत्तिः प्रवर्तते। केवले प्रत्यगात्मनि न कश्चिद्विकारोऽस्तीति भावः॥ २५॥

---

आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति।
जीवः सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति॥ २६॥

एतदेव स्पष्टयति—'आत्मनो विक्रिया नास्ती'ति। आत्मा स्वभावादेव विक्रियारहितः[7], बुद्धेः कदाचिदपि बोधशंकैव नास्ति। तथापि जीवः साभासाहंकारः[8]—साभासान्तःकरणः सर्वं ज्ञात्वाहं ज्ञाता[9] द्रष्टेति मुह्यति[10]भ्रान्तो भवतीत्यर्थः॥ २६॥

[1]SM wrongly reads न तस्याश्च नाशे instead of तस्या बुद्धेर्नाशे.

[2]SM reads लीने for लये. [3]1M mis-reads भ्रमः for धर्मा.

[4]1M reads आत्मा कीदृक्स्वभावः for कीदृगात्मस्वभावः.

[5]1M roads प्रत्यगात्मनि for प्रत्यगात्मनः. [6]1M omits यद्यपि°.

[7]1M reads विकारशून्यो for विक्रियारहितः.

[8]1M reads here as follows :—सर्वं साभासान्तःकरणवृत्तिनां तप्तायःपिण्डवदेकत्र संगत्य तमेवालमत्यर्थं ज्ञात्वा देहेन्द्रियादिकमहमिति विचार्याहं कर्ताहं द्रष्टेति मुह्यति।

[9]SM reads कर्ता for ज्ञाता.

[10]The word अलम् in the sloka should be connected with मुह्यति as अलं मुह्यति, अत्यर्थं मुह्यति इत्यर्थः.



रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत्।
नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत्॥ २७॥

आत्मा स्वयमेव स्वस्मिन्नविवेकेन अन्यधर्मानारोप्य बिभेतीत्याह—'रज्जुसर्पवदि'ति। यथा मन्दान्धकारादौ सर्पारोपं कृत्वा भयकम्पादिकं वहेदेवमात्मापि स्वस्मिन् जीवत्वमारोप्य स्वं सद्वितीयं परिच्छिन्नं ज्ञात्वा भयं वहेद्[1] दुःखसागरे निमग्नो[2] भवति। यदा शास्त्राचार्यप्रतिपादितेन[3] शास्त्रार्थज्ञान[4]मुत्पन्नं भवति तदा विवेकचक्षुषा स्वमात्मानमखण्डानन्दज्ञानैकरूपं संपश्यन् ततो नाहं जीवः परमात्माऽहमिति ज्ञात्वा[5] भयदुःखरहितः सुखी भवेत्॥ २७॥

---

आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि च।
दीपो घटादिवत् स्वात्मा[6] जडैस्तैर्नावभास्यते॥ २८॥

नन्वात्मा अत्यन्तसामीप्यकैर्बुद्धिमनोऽहंकारादिभिः कथं नावलोक्यते—न ज्ञायते तत्राह—'आत्मे'ति। आत्मा केवल[7] एव सन्नपि बुद्धिमनोऽहंकारादीन्यवभासयति, तै जडैर्मनआदिभिरात्मा नावभास्यते, यथा एक एव दीपो घटादीन् सर्वानप्यवभासयति, तै[8]र्घटादिभिर्दीपो नावभास्यते, तद्वदित्यर्थः॥ २८॥

---

स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने॥ २९॥

आत्मा बुद्ध्यहंकारादिभिर्नावभास्यते यदि तर्हि आत्मज्ञाने ज्ञानान्तरेण भवितव्यमित्याशंक्याह—'स्वबोधे' इति[9]। आत्मनो बोधरूपत्वात् स्वबोधे नित्ये सति, तस्यात्मनो बोधाय ज्ञानान्तरापेक्षा नास्त्येव, अनुभवरूपत्वात्,[10] यथा दीपस्य स्वप्रकाशकाले[11] दीपान्तरापेक्षा नास्ति तद्वदित्यर्थः॥ २९॥

---

निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः।
विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः॥ ३०॥

यदि बुद्ध्यादिभिरात्मा ज्ञेयो न भवेत् तर्हि आत्मज्ञाने उपायान्तरं वाच्यम्, स उपायः क इत्याह—'निषिध्ये'ति। अथात आदेशो नेति नेतीत्यतन्निरसनवेदवाक्यै[12] निखिलोपाधीन्निषिध्य[13]

[1]SM omits भयं वहेत्. [2]SM reads बहुदुःखसागरनिमग्नो.

[3]1M reads शास्त्राचार्यप्रत्यादेशेन. [4]1M reads शास्त्रीयं ज्ञानम्.

[5]SM omits ज्ञात्वा. [6]1M reads साक्षी for स्वात्मा.

[7]1M reads एक एव. [8]1M reads प्रकाशितः for तैः.

[9]SM wrongly omits from आत्मज्ञाने upto स्वबोध इति.

[10]1M reads स्वानुभवत्वात् for अनुभवरूपत्वात्.

[11]1M reads प्रकाशने for स्वप्रकाशकाले.

[12]SM reads नेत्यतन्निरसनादेव इति वेदवाक्यैः which is evidently a misreading.

[13]1M reads आत्मानं ज्ञात्वा after निषिध्य, and omits from अनात्मत्वेन up to निरस्य.

अनात्मत्वेन ज्ञात्वा तं निरस्य 'तत्त्वमसि'[1] 'अयमात्मा ब्रह्मे'[2]त्यादि महावाक्यै[3] र्लक्षणया ब्रह्मात्मैक्यज्ञानं विद्यात् प्राप्नुयात्। अनेन प्रकारेण ज्ञातव्यमित्यर्थः॥ ३०॥

---

आविद्यकं शरीरादि दृश्यं बुद्बुदवत् क्षरम्।
एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम्॥ ३१॥

आत्मस्वरूपज्ञाने अतन्निरसनाभावे का क्षतिरित्याशंक्य अतन्निरसनाभावे आत्मा ज्ञातुमशक्यः; यथा नायं सर्प इत्यारोपितस्यापकरणाभावे[4] रज्जुज्ञानं नोत्पद्यते तद्वदनात्मनिरसनाभावे आत्मा[5] न ज्ञायते[5] इत्याशयवानाह[6]—'आविद्यक'मिति। देहेन्द्रियादि सर्वं दृश्यजातमाविद्यकं दृश्यत्वात्, बुद्बुदवत् क्षरं नश्वरम्, एतद्विलक्षणं निर्मलं निरुपाधिकं नित्यमेकं सच्चिदानन्दात्मकं[7] ब्रह्मैवाहमस्मीति विद्यात्; ततः कृतकृत्यो भवतीत्यर्थः॥३१॥

---

देहान्यत्वान्न मे जन्म जडाकार्श्यलयादयः।
शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च॥ ३२॥

एवमुक्तरीत्यात्मानमद्वयानन्दं[8] वाक्यार्थज्ञानेनापरोक्षतया ज्ञात्वा स्वानुभवविष्टम्भेना[9]त्मन्येवात्मना मननप्रकारमाह पञ्चभिः[10] श्लोकैः—'देहान्यत्वा'दिति। जडदृश्यत्वादिस्वभावस्थूलशरीरान्यत्वात् 'मे' मम[11] जन्मजडाकार्श्यादयो न सन्ति, इन्द्रियादिभिरसङ्गत्वाच्छब्दादिविषयभोगैः सङ्गानुभवो नास्त्येव॥ ३२॥

---

अमनस्त्वान्न मे दुःखरागद्वेषभयादयः।
अप्राणो ह्यमना शुभ्र इत्यादि श्रुतिशासनात्॥ ३३॥

'अमनस्त्वा'दिति[12]। कथमिन्द्रियप्राणमनसा नावभासते इत्याशंक्य श्रुतिं प्रमाणयति अप्राण[13] इति स्पष्टार्थः॥ ३३[14]॥

---

[1]Chāndyogyopaniṣad—6-11. [2]Māndukyopaniṣad—1.

[3]SM wrongly reads तत्राहमिति वाक्यैः for महावाक्यैः.

[4]SM reads अपि here which is superfluous.

[5]SM reads अनात्मनिरसनेनात्मा ज्ञातव्यः.

[6]SM reads आविष्करोति instead of आह आविद्यकेति. [7]SM omits सच्चिदानन्दात्मकं.

[8]SM reads आत्मानन्दं for आत्मानमद्वयानन्दं.

[9]1M reads अवष्टम्भेन for विष्टम्भेन. [10]1M reads देहेति पञ्चभिः.

[11]1M omits मम. [12]SM omits अमनस्तादिति.

[13]Muṇḍakopaniṣad—2.1

[14]1M omits स्पष्टार्थः and separately reads स्पष्टम् with the No. 33. Hence subsequent numbers of 1M tally with our numbers, which were ahead by one up to this, due to inclusion of verse No. 8.



निर्गुणो निस्क्रियो नित्यो निर्विकल्पो निरञ्जनः।
निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः॥ ३४॥

गुरोः प्रसादात्[1] स्वानुभवसिद्धमर्थमभिनयति 'निर्गुण' इत्यादिभिस्त्रिभिः श्लोकैः। अहं निर्गुणो बुद्ध्यभावात्, निष्क्रिय इन्द्रियाद्यभावात्, नित्योऽपरोक्षत्वात्[2], निर्विकल्पो विकल्पाभावात्[3], निरञ्जनोऽसङ्गत्वात्, निर्विकारो निरवयवत्वात्, नित्यमुक्तो बन्धाभावात्, निर्मलोऽविद्यातत्कार्यरहितत्वात्॥३४॥

---

अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः।
सदा सर्वसमः शुद्धो[4] निःसङ्गो निर्मलोऽचलः॥ ३५॥

ननु पूर्वोक्तहेतुभिरेवं [5]विशिष्टस्वरूपं ज्ञानं सिद्धमित्युक्तं तत् किंविशिष्ट[5]मित्याशंक्याह—'अहमाकाशव'दिति। अहमाकाशवत् सर्वस्य दृश्यजडस्य[6] बहिरन्तर्गतोऽच्युतः च्युतिरहितः, सदा सर्वसमो विषमेष्वपि समतया[7] व्याप्य स्थितः, तथा शुद्धो निर्लेपः, अचलः पूर्णस्य चलनाभावात्[8]॥ ३५॥

---

नित्यशुद्धविमुक्तैकमखण्डानन्दमव्ययम्।
सत्यं ज्ञानमनन्तं यत् परं ब्रह्माहमेव तत्॥ ३६॥

'नित्यशुद्धे'ति। एकमखण्डानन्दं द्वितीयाभावादद्वयं[9] सत्यं ज्ञानमनन्तं यत् परं ब्रह्मेति श्रुत्या[10] प्रतिपाद्यते तदेव तत्[11] परं ब्रह्मैवाहमस्मीति[11] स्वरूपं[12] कथितम्॥ ३६॥

---

एवं निरन्तरकृता ब्रह्मैवास्मीति वासना[13]।
हरत्यविद्याविक्षेपान् रोगानिव रसायनम्॥ ३७॥

---

[1]1M reads गुरुप्रसादात्.

[2]1M reads here नित्य अपरोक्षया भावात्, and SM reads नित्यापरोक्षत्वाभावात् which are evidently misreadings. The reading might possibly be नित्योऽपरोक्षतया भावात् or नित्यो नित्यापरोक्षत्वभावात्.

[3]1M reads संकल्पविकल्पाभावात्. [4]Vanivilas edition reads सिद्धो for शुद्धो.

[5]1M reads विशिष्टस्वरूपप्रज्ञासिषमित्युक्तं; SM reads विशिष्टं स्वरूपं ज्ञानसिद्धमिति, मुक्त्वेतत् किमिति विशिष्टम् ......

[6]1M reads सर्वजगतो. [7]SM reads समं.

[8]SM reads पूर्णस्य चलनाभाव इति यावत्.

[9]The commentator seems to take the reading as अद्वयम् instead of अव्ययम्.

[10]Taittirīyopaniṣad—2.1.

[11]SM reads तद्ब्रह्माहमेव तदस्मीति. [12]1M reads स्वरूपतत्त्वं for स्वरूपं.

[13]1M reads the line as एवं निरन्तरं ब्रह्मैवाहमस्मीति वासना.

पूर्वश्लोकोक्तमननं चिरकालाभ्यस्तं सत् किं[1] पुरुषार्थं साधयतीत्याह—'एवं निरन्तरकृते'ति। एवमुक्तप्रकारेण ब्रह्मैवाहमस्मीति नैरन्तर्येण चिरकालाभ्यस्ता वासना अविद्याकृतविक्षेपान्निःशेषतो नाशयति, यथा रसायनमौषधं चिरकालसेवितं सद्[2] रोगान्निःशेषतो नाशयति तद्वदित्यर्थः ॥ ३७ ॥

---

विविक्तदेश आसीनो विरागो विजितेन्द्रियः।
भावयेदेकमात्मानं तमनन्तमनन्यधीः ॥ ३८ ॥

ब्रह्मानुसन्धाने साधननियमानाह[3]—'विविक्तदेश' इति। जनसंबन्धवर्जिते[4] देशे आसीनः सुखोपविष्टः, विरागः सर्वत्र गताभिलाषोऽत एव निर्जितानीन्द्रियाणि येन सः, अनन्तमपरिच्छिन्नमेकमद्वयं तमात्मानम्, अनन्यधीर्ब्रह्मण्येव स्थिता निश्चयात्मिका बुद्धिर्यस्य तादृशो भावये[5]द्ध्यायेत् ॥ ३८ ॥

---

आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः।
भावयेदेकमात्मानं निर्मलाकाशवत् सदा ॥ ३९ ॥

दृश्यप्रपञ्चे जाग्रति[6] सति [7]कथमेतत्तत्त्वभावना सम्भवती[7]त्यत आह—'आत्मन्येवे'ति। अखिलं दृश्यजातं सुधीः शुद्धान्तःकरणः सन् शुद्धया धिया आत्मन्येव समाधिसमये प्रविलाप्य प्रकर्षेण नाशयित्वा तदा द्वितीयाभावादेकमात्मानं सज्योतिष्काकाशवद्[8] भावयेदवतिष्ठेत्[9]॥ ३९ ॥

---

रूपवर्णादिकं सर्वं विहाय परमार्थवित्।
परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते[10] ॥ ४० ॥

परमार्थदर्शी मुनिर्नामरूपवर्णादिकं सर्वं विहाय परिपूर्णज्ञानानन्दरूप एवावतिष्ठते इत्यत आह—'रूपवर्णादिक'मिति[11] स्पष्टार्थः ॥ ४० ॥

---

ज्ञातृज्ञानज्ञेयभेदः परे नात्मनि विद्यते।
चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव हि ॥ ४१ ॥

ननु [12]मात्रादित्रिपुटिज्ञानं वर्तमानमुपलभ्यते कथमेकत्वभावनेत्याशंक्य परमात्मनि भेदो नास्त्येवेत्याह—'ज्ञात्रि'ति। [13]ज्ञातृज्ञानज्ञेयभेदः कल्पित[13] आत्मन्यवभाति, ज्ञानानन्दैकरुपत्वादात्मा स्वयमेव दीप्यते[14] प्रकाशते ॥ ४१ ॥

[1] SM omits किं. [2] 1M reads तद्रोगं for सद् रोगान्.
[3] 1M reads ब्रह्मानुसन्धानसाधने नियमानाह.
[4] 1M reads विविक्तदेशे before जनसंबन्धवर्जिते. [5] SM reads भवेत्.
[6] 1M omits जाग्रति. [7] 1M reads कथमेकत्वं भवति.
[8] SM reads something unintelligible. 1M reads सदा ज्योत्स्नाकाशवत्.
[9] SM reads तिष्ठेत् for अवतिष्ठेत्. [10] 1M reads अवतिष्ठति for अवतिष्ठते.
[11] 1M reads श्लोकश्चायं स्पष्टार्थः. [12] 1M reads प्रमात्रादि.
[13] 1M reads ज्ञात्रादिभेदः परमात्मनि न विद्यते, स भेदः कल्पित. [14] 1M reads दीप्यति.



एवमात्मारणौ ध्यानमथने सततं कृते।
उदितावगतिज्वाला सर्वाज्ञानेन्धनं दहेत् ॥ ४२ ॥

एवं विशुद्धवस्तुध्यातुः प्रत्यक्षफलमाह—'एवमात्मे'ति। आत्मैव[1] पूर्वोऽरणिरन्तःकरणमेवोत्तरारणिः[1] ध्यानेन तयोर्मथने सर्वदा कृते तत्रोदिता ज्वालारूपावगतिर्ज्ञानं[2] विद्या अज्ञानमेवेन्धनं[3] मूलाज्ञानं[4] निःशेषतः सपरिकरं नाशयति; तदा मुमुक्षुः स्वाराज्येऽभिषिक्तः कृतकृत्यो भवतीत्यर्थः ॥ ४२ ॥

---

अरुणेनेव बोधेन पूर्वं संतमसे हृते।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४३ ॥

जीवपरयोरत्यन्तैक्यज्ञानेनाविद्यापरिकल्पिते[5] संतमसे निःशेषमपगते[6] सति परमात्मा स्वयमेवाविर्भवेदित्याह—'अरुणे'ति। अरुणप्रकाशेनादौ अन्धकारे क्षयेऽंशुमान् यथाविर्भवति[6] तथात्मापीत्यर्थः ॥ ४३ ॥

---

आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया।
तन्नाशे प्राप्तवद्भाति स्वकन्ठाभरणं यथा ॥ ४४ ॥

आत्मा सर्वदा परोक्षस्वभावत्वादप्राप्त एव, स आत्मा कदा प्राप्तो भवेदिति शिष्याभिप्रायमाशंक्याह[7]—'आत्मा तु सतत'मिति। आत्मा सर्वत्र पूर्णोऽद्वयानन्दरूपः सर्वदा प्राप्त एवाविद्यावशाद् भ्रान्त्या अप्राप्त इवाभाति, तन्नाशे तदावरणाविद्यानाशे वाक्यश्रवणात् प्राप्त [8]इवाभाति कन्ठगतचामीकरन्यायेनेत्यर्थः ॥ ४४ ॥

---

स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीवता।
जीवस्य तात्त्विके रूपे तस्मिन् दृष्टे निवर्तते ॥ ४५ ॥

ननु जीवस्य[9] परमात्मनैक्यमयुक्तं परमात्मनो जीवत्वविरोधिस्वभावत्वात्तत्राह[9]—'स्थाणा'विति। [10]यथान्धकारस्थिते स्थाणौ पुरुषोऽयमिति चोरशंकया बिभ्यति तथैवाविचारात् ब्रह्मणि जीवत्वमारोप्यते, तथा[11] शास्त्रोपदेशजनितविवेकदृष्ट्या[12] तस्य जीवस्य तात्त्विकरूपे लक्ष्ये[13] तत्त्वंपदार्थे[14]

[1] Here both the manuscripts are confused and incorrect in their readings; so, the possible correct reading has been given.
[2] 1M omits ज्ञानं. [3] SM reads अविद्यामेवेन्धनं. [4] 1M omits मूलाज्ञानं.
[5] SM reads here अविद्यापरिकल्पिताकृततमसे निःशेषपह्नुते.
[6] 1M reads आविर्भवेत् for आविर्भवति. [7] 1M omits आशंक्य.
[8] SM reads एव for इव. [9] 1M reads जीवपरमात्मनोरेकत्वमयुक्तमित्याशंक्याह.
[10] SM wrongly omits from यथान्धकारस्थिते upto आरोप्यते.
[11] SM reads यथा for तथा. [12] 1M reads शास्त्रोपदेशदृष्ट्या.
[13] SM wrongly reads तात्त्विकरूपेणालक्ष्ये सति. [14] SM reads त्वंपदार्थे.

दृष्टे ज्ञाते ब्रह्मणि भ्रान्त्या[1] कल्पितत्वाज्जीवत्वमपि निवर्तते, ब्रह्मैवाहमिति जानातीत्यर्थः ॥ ४५ ॥

---

तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमञ्जसा ।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४६ ॥

अहं ममेति प्रत्यये जाग्रति कथं नाहमिति प्रत्यय इत्याशंक्य तदपि तथैव मृषा इत्याह—'तत्त्वस्वरूपे'ति । जीवपरमात्मनोरेकत्वानुभवादुत्पन्नं[2] यज्ज्ञानं तदहं ममेत्यज्ञानं बाधते, दिग्भ्रमादिवदिति भानुदर्शनादित्यर्थः ॥ ४६ ॥

---

सम्यग्विज्ञानवान् योगी स्वात्मन्येवाखिलं स्थितम् ।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ॥४७ ॥

अहं ममेति प्रत्यये नष्टे योगी सम्यग्विवेकवान् सन् विज्ञानेन चक्षुषा सर्वं दृश्यं प्रपञ्चं स्वात्मन्येवानुभवेन पश्यतीत्याह—'सम्यगि'ति । एकमात्मानं सर्वं पश्यति, तदा तद्रूपो भवतीति भावः[3] ॥ ४७ ॥

---

आत्मैवेदं जगत् सर्वमात्मनोऽन्यन्न विद्यते[4] ।
मृदो यद्वद्घटादीनि स्वात्मानं सर्वमिक्षते ॥ ४८ ॥

नन्वात्मा सर्वं न भवति प्रत्यक्षविरोधात्, नानात्वेन दृश्यमानमिदं सर्वं[5] कथमात्मन्यभेदेन पश्यतीत्याह—'आत्मैवेद'मिति । इदं सर्वं जगदात्मैवात्मकार्यत्वादतोऽन्यदात्मनो न किञ्चिद्विद्यते, यथा घटशरावादिकार्यं[6] मृदोऽन्यन्नास्ति । अतः स्वात्मन्येव सर्वं दृश्यजातमभेदेनेक्षते पश्यति, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः[7] ॥ ४८ ॥

---

जीवन्मुक्तस्तु तद्विद्वान् पूर्वोपाधिगुणांस्तजेत् ।
स सच्चिदादिधर्मत्वं भजेद्भ्रमरकीटवत् ॥ ४९ ॥

एवम्भूतावस्थैव जीवन्मुक्तिरित्याह 'जीवन्मुक्तिस्त्वि'ति । अनाद्यविद्यापरिकल्पितपूर्वोपाधिं देहमनोबुद्ध्यादीन् गुणान् सत्त्वादीन् परित्यजेत्, तदैव[8] जीवन्मुक्त इत्युच्यते; स जीवन्मुक्तः[9] सच्चिदानन्दादिगुणकत्वाद्भ्रमरकीटवत् साक्षाद्ब्रह्म भजेत् प्राप्नोतीत्यर्थः ॥ ४९ ॥

---

तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् ।
योगी शान्तिसमायुक्त आत्मारामो विराजते ॥ ५० ॥

तत्त्वज्ञस्तु आत्मारामः सुखं तिष्ठतीत्याह—'तीर्त्वा मोहार्णव'मिति । मोह एव अर्णवोऽपर्य-

[1]1M omits ब्रह्मणि भ्रान्त्या. [2]1M reads तत्त्वस्वरूपानुभवादुत्पन्नं.

[3]SM omits the whole of this commentary and only reads अहं ममेति प्रत्ययेर्थः, which is evidently a misreading.

[4]Vanivilas edition reads न किञ्चन. [5]1M reads स for सर्वं.

[6]1M reads...मृत्कार्यं for कार्यं. [7]Chāndyogyopaniṣad—6.1.

[8]1M reads इति इयमेव जीवन्मुक्तिरित्युच्यते. [9]1M omits स जीवन्मुक्तः.



न्तत्वात्, तं ज्ञानप्लवेन तीर्त्वा निःशेषं नाशयित्वा, रागद्वेषादय एव राक्षसा मोक्षपरिपन्थिनः,[1] तान् निःशेषतो नाशयित्वा शान्तिसमायुक्तः शमदमादिसहित आत्माराम आत्मन्येव[2] आरामः[3] क्रीडा यस्य स विराजते स्वाराज्येनाभिषिक्तः प्रकाशते । अर्थान्तरं ध्वन्यते—श्रीरामः[4] समुद्रं तीर्त्वा रावणादिराक्षसान् हत्वा, सीता एव[5] शान्तिस्तया समेतो विराजते, अयोध्यायां विजृम्भते[6] ॥ ५० ॥

---

बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः ।
घटस्थदीपवच्छश्वदन्तरेव प्रकाशते ॥ ५१ ॥

जीवन्मुक्तस्य लक्षणमाह—'बाह्यानित्ये'ति । बाह्येन्द्रियविषयोद्भवामनित्यसुखस्यासक्तिं प्रीतिं सवासनां[7] हित्वा, तत्र हेतुरात्मसुखेन निर्वृतः । घटस्थदीपवदन्तरेव प्रकाशते, स्वसाक्षिकमेवात्मानुभवसुखमितरैर्न ज्ञायते इत्यर्थः ॥ ५१ ॥

---

उपाधिस्थोऽपि तद्धर्मैरलिप्तो व्योमवन्मुनिः ।
सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥ ५२ ॥

एवमुक्तप्रकारेण जीवन्मुक्तः [8]सन्नारब्धसंक्षयादेवं [9]वर्तितव्यमित्याह—'उपाधिस्थोऽपी'ति । देहाद्युपाधौ साक्षितया स्थितोऽपि मुनिर्व्योमवत्तद्धर्मै[10]र्नानुलिप्तः, मम कर्मलेपो[11] नास्तीति भावयेत्, सर्वज्ञोऽपि[12] मूढवत् [13]प्राकृतवत्तिष्ठेत्, सर्वत्र विषयेषु यदृच्छाप्राप्तेष्वनासक्तो[14] वायुवच्चरेत् ॥ ५२ ॥

---

उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ।
जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥ ५३ ॥

प्रारब्धकर्मक्षये देहोपाधौ लीने विदेहकैवल्यमाह—'उपाधिविलया'दिति । उपाधिभूतदेहद्वयलये प्रारब्धकर्मक्षये मुनिर्योगी विष्णौ सर्वव्यापके परब्रह्मणि निर्विशेषं यथा भवेत् तथा विशेत् । अत्यन्तैक्ये दृष्टान्तो जले जलमित्यादि ॥ ५३ ॥

[1]SM misreads मोहावृत for मोक्षपरिपन्थिनः.

[2]1M omits एव. [3]SM omits आरामः.

[4]1M reads रामाख्यो रामः.

[5]SM omits एव, and 1M reads इव for एव.

[6]1M omits विजृम्भते. [7]SM reads सर्वां for सवासनां.

[8]आ आरब्धसंक्षयादित्यर्थः.

[9]1M reads वर्तते for वर्तितव्यम्. [10]SM reads धर्मैः.

[11]SM misreads कर्मलोपो for कर्मलेपो. [12]SM omits अपि.

[13]1M reads अज्ञवत् for प्राकृतवत्.

[14]1M reads आसक्तिरहितः सन.

यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५४ ॥

ब्रह्मणः सर्वाधिष्ठानत्वात् तटस्थलक्षणेनाभिधीयते श्लोकद्वयेन 'यल्लाभा'दित्यादि। यद्ब्रह्मसाक्षात्कारलाभादपरो लाभो न विद्यते सर्वलाभानां तत्रैवान्तर्भावात्[1] यथा ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भावः, यत्सुखाद्ब्रह्मानुभवसुखादपरं सुखं नास्ति निरतिशयसुखत्वात्, यज्ज्ञानाद् ब्रह्मसाक्षात्कारज्ञानादपरं ज्ञानं नास्ति मोक्षहेतुत्वात्, ब्रह्मेति तज्जानीयात् ॥ ५४ ॥

---

यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५५ ॥

'यद्दृष्ट्वे'ति[2]। यद्दृष्ट्वापरं[3] द्रष्टव्यं नास्ति तेनैव पुरुषार्थस्य सिद्धत्वात्, यद्भूत्वा[4] येनैक्यं प्राप्य[5] पुन[6]र्जन्मादिकं नास्ति, यज्ज्ञात्वा यत्स्वरूपं ज्ञात्वान्यज्ज्ञेयं नास्ति, तदेव ब्रह्मेत्यवधारयेत्। अन्यत् सर्वं वृथा पाण्डित्यमित्यर्थः ॥ ५५ ॥

---

तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्।
अखण्डं[7] नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५६ ॥

तिर्यगूर्ध्वमधः सर्वत्र ब्रह्मैव पूर्णमित्याह—तिर्यगूर्ध्वमिति स्पष्टोऽर्थः[8] ॥ ५६ ॥

---

अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽव्ययम्।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५७ ॥

[9]अखण्डानन्दमेकं ब्रह्म वेदान्तैरतद्व्यावृत्तिरूपेणा[10]तन्निरसनद्वारा ज्ञातव्यमित्याह[11]—'अतद्व्यावृत्तिरूपेणे'ति[12] स्पष्टोऽर्थः[13] ॥ ५७ ॥

---

अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः।
ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः ॥ ५८ ॥

ननु ब्रह्मादयोऽपि निरतिशयानन्दिन[14] एव श्रूयन्ते, तत्राह—'अखण्डे'त्यादि। ब्रह्मेन्द्रादयः

[1]1M reads अन्तर्भूतत्वात् for अन्तर्भावात्.
[2]SM omits यद्दृष्ट्वेति. [3]1M reads अन्यद् for अपरं.
[4]SM omits यद्भूत्वा.
[5]1M reads गत्वा for प्राप्य. [6]1M reads पुनर्भवजन्मादिकं.
[7]Vanivilas edition reads अनन्तं. [8]1M reads स्पष्टार्थः.
[9]1M reads अतद्व्यावृत्तीति. [10]SM reads रूपैः for रूपेण.
[11]1M reads इत्यर्थः for इत्याह. [12]1M omits अतद्व्यावृत्तिरूपेणेति.
[13]1M reads here अयमपि स्पष्टार्थः.
[14]SM reads as सातिशयानन्दिन.



परिच्छिन्नानन्दिन एव, ब्रह्म तु [1]अखण्डानन्दरूपत्वादपरिच्छिन्नमानन्दम्[2], एवं स्वरूपं[3] यस्य तस्य आनन्दलेशमाश्रित्य ब्रह्मेन्द्रादयोऽप्यानन्दिनो भवन्ति आनन्दतारतम्येण, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'त्यादिश्रुतेः[4] ॥ ५८ ॥

---

तद्युक्तमखिलं वस्तु व्यवहारश्चिदन्वितः[5]।
तस्मात् सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५९ ॥

ननु यदि[6] परमप्रेमास्पदमात्मैव[7] भातीत्युच्यते [8]तदा कथं देहादिप्रपञ्चोऽपि[8] प्रियतरोऽनुभूयते इत्याशंक्याह—'तद्युक्त'मिति। अखिलदेहाद्यनात्मवस्त्वपि तत्[9] तेनात्मना संयुक्तमेव प्रियतरं लौकिकोऽपि व्यवहारस्तद्युक्त[10] एव प्रियतरः। तस्मात् सर्वगतं ब्रह्म अनन्तं प्रियं, यथा क्षीरं सर्वं व्याप्य [11]घृतमिति एवमवस्त्वपि ब्रह्मव्याप्तत्वात् प्रियमिव[12] भाति। अत आत्मैव प्रियतम इति सिद्धम् ॥ ५९ ॥

---

अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम्।
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥

तर्ह्यात्मा केन प्रकारेण सर्वं व्याप्य तिष्ठतीत्याशंक्य साक्षाद्वक्तुमशक्यत्वादनणु अस्थूलमिति श्रुतेः[13] सत्तारूपेण भातीत्याह—अनण्वस्थूलमिति[14] स्पष्टोऽर्थः ॥ ६० ॥

---

यद्भासा[15] भास्यतेऽर्कादि भास्यैर्यत्तु[16] न भास्यते।
येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६१ ॥

पुनस्तद्ब्रह्मेति[17] ज्ञानार्थं श्लोकत्रयेन पृथङ्निरूपयति—'यद्भासे'ति[18]। यद्वस्तु भान्वादीन् भासयेत्[19]

[1]1M reads अखण्डानुभवरूपत्वात्.
[2]SM reads आनन्दमेव रूपं°, and 1M reads आनन्दमेव स्वरूपं°.
[3]SM reads आनन्दसमुद्रस्य after तस्य. [4]Bṛhadāraṇyakopaniṣad—4.3.
[5]IM reads. स्तदन्वितः [6]1M omits ननु यदि.
[7]1M reads प्रेमास्पदतयात्मैव. [8]1M reads एतदयुक्तमात्मविद्देहादिप्रपञ्चः.
[9]1M reads तद्युक्तं. [10]1M reads तद्युक्तरूप एव.
[11]1M reads घृतमेवास्ति, but SM omits एवम and misreads वस्त्वपि.
[12]1M reads प्रियमेव.
[13]Bṛhadāraṇyakopaniṣad—3.8. But the reading should be अस्थूलमनणु, etc. 1M omits the śruti.
[14]1M reads अत एवेति स्पप्टार्थः which is evidently a misreading.
[15]1M misreads यद्भासे र्भास्यते. [16]1M reads यत्तन्न भास्यते.
[17]1M omits इति. [18]1M reads यदिति. [19]1M reads अवभासयेत्.

यच्च[1] भास्यैरर्कादिभिर्नैव[2] भास्यते, 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निस्तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती'ति श्रुतेः[3] ; येन सर्वमिदं भूतभौतिकभावरूपं जगत् भाति तद्ब्रह्मेति जानीयात् ॥ ६१ ॥

---

स्वयमन्तर्बहिर्व्याप्य भासयन्नखिलं जगत् ।
ब्रह्म प्रकाशते वह्निप्रतप्तायसपिण्डवत् ॥ ६२ ॥

[4]तप्तायःपिण्डवत् स्वयमेवान्तर्बहिर्व्याप्य भासयन्नखिलं ब्रह्म प्रकाशते इत्याह 'स्वयमन्त'रिति स्पष्टोऽर्थः[5] ॥ ६२ ॥

---

जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किंचन ।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ ६३ ॥

पुनस्तदेवाह—'जगद्विलक्षण'मिति[6] । सर्वं ब्रह्मैव सत्यं; तथापि जगद्रूपेण यदा[7] पश्यति [8]तदा न गृह्यते, जगद्वैलक्षण्येन तत्कारणत्वेन[9] विचार्यते चेत्तदा ज्ञातुं शक्यं ब्रह्मणोऽन्यन्न विद्यते[10] । यदितोऽन्यद्दृश्यते[11] यत्किञ्चित् तन्मृषैव [12]मरुमरीचिकावन्निर्जलदेशस्थसूर्यकिरणारोपितजलवदित्यर्थः[13] ॥ ६३ ॥

---

दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्[14] ।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमव्ययम् ॥ ६४ ॥

पुनस्तदेव ब्रह्म[15] स्फुटं निरूपयति 'दृश्यते' इति । [16]चक्षुषा यद्दृश्यते, श्रूयते यद्यच्छोत्रेण, यद्यन्मनसा स्मर्यते, वाचा यद् यदभिधीयते[16] तत्त्वज्ञानात्तत्सर्वं ब्रह्म सच्चिदानन्दमद्वयं ब्रह्मान्यन्न[17] किञ्चिदस्तीत्यर्थः ॥ ६४ ॥

---

सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरीक्षते ।
अज्ञानचक्षुर्नेक्षते[18] भास्वन्तं भानुमन्धवत् ॥ ६५ ॥

[1]1M reads यत्तु. [2]1M reads नै भास्यते.

[3]Kaṭhopaniṣad—2.2. [4]SM omits this portion from तप्तायः upto इत्याह.

[5]1M reads स्पष्टार्थः. [6]1M reads जगदिति.

[7]SM reads यथा. [8]SM reads तथा.

[9]SM reads कारणकार्यत्वेन and 1M reads तत्कार्यत्वेन. [10]1M reads इति after विद्यते.

[11]1M misreads ततो सत् दृश्य यत्किञ्चित्, etc. [12]1M reads मृगतृष्णाजलवदित्यर्थः.

[13]1M omits from निर्जलदेशस्थ...upto जलवदित्यर्थः.

[14]1M reads न किञ्चन for न तद्भवेत्.

[15]1M omits ब्रह्म.

[16]1M reads as चक्षुषा च दृश्यते श्रोत्रेण श्रुयते यन्मनसा स्मर्यते यच्च वाचा अभिधीयते, etc.

[17]1M reads ब्रह्मणोऽन्यन्न.

[18]1M reads नेक्षेत for नेक्षते.



'सर्वग'मिति । श्रुतिश्च—'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा । ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान'[1] इति । यदि सर्वगतं ब्रह्म तर्हि[2] सर्वैः किं न दृश्यत इत्याशंक्य चक्षुरादिभिर्न गृह्यते इति तत् श्रुत्या[3] प्रतिपादयति[4] । [5]योऽज्ञानचक्षुः स सर्वगमपि सच्चिदानन्दं ब्रह्म न पश्यति यथा प्रकाशमानमपि भानुमन्धो न पश्यति; ज्ञानप्रसादेन ज्ञानचक्षुषा सर्वत्र ब्रह्मैव पश्यतीत्यर्थः ॥ ६५ ॥

---

श्रवणादिभिरुद्दीप्त[6]ज्ञानाग्निपरितापितः ।
जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयम् ॥ ६६ ॥

[7]एवं तावदुक्तरीत्यानुभवसम्पन्नस्यापि तदभ्यासरहितस्य वासनावशात् किञ्चिदज्ञानं सम्भवति तत्परिहारार्थं पुनः श्रवणादिकं[8] कुर्यादित्याह—'श्रवणादिभि'रिति । जीवः प्रत्यगात्मा एतत्प्रकारेण[9] उक्तार्थस्य[10] श्रवणमननादिभिरुच्चैर्दीप्तः प्रकाशित ज्ञानमेवाग्निस्तेन [11]परितापितः परितो विशेषतश्च शोधित इत्यर्थः[11] । सर्वसंसारमूलाज्ञानमलान्मुक्तः[12] स्वयमेव सम्यक् प्रकाशते, यथाग्निना [13]परितापितं सुवर्णं प्रकाशते ॥ ६६ ॥

---

हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोऽपहृत् ।
सर्वव्यापी सर्वधारी भाति भासयतेऽखिलम् ॥ ६७ ॥

एवं विशोधितो जीवः परमात्मा हृदाकाशे[14] उदितः सन् तमोऽज्ञानमुपसंहरन् भानुवत् सर्वस्वरूपप्रकाशो[15] इत्याह—'हृदाकाशोदित' इति । आत्मबोध[16] एव भानुः, सर्वस्याधारभूतत्वात् सर्वव्यापी सर्वधारी च, शेषं स्पष्टम् ॥ ६७ ॥

[1]Muṇḍakopaniṣad (3.1). Insertion of this Upaniṣad text and the following two lines seem somewhat redundant.

[2]SM reads तत्.

[3]1M reads इत्यनया श्रुत्या for इति तत् श्रुत्या.

[4]SM wrongly reads 'चक्षुषेति' after प्रतिपादयति ।.

[5]1M reads some unintelligible words and then reads विशुद्धसत्तः निवृत्याविद्यः सदा (सवत्र ब्रह्मैव, etc.) and omits from योऽज्ञानचक्षु upto ज्ञानचक्षुषा.

[6]1M reads...रुद्दीप्तो.

[7]1M reads एवमामुक्तेरनुभवसम्पन्नस्यापि.

[8]1M misreads स्मरणादिकं.

[9]1M reads एतत्प्रकरणार्थः for एतत्प्रकारेण.

[10]1M omits उक्तार्थस्य.

[11]1M reads परितः विशोधित इत्यर्थ for the whole portion.

[12]1M reads मूलभूताज्ञान°.

[13]1M reads स्वर्णम् उपाधिकृतं दुर्वर्णादि हित्वा स्वरूपेण प्रकाशते तद्वदित्यर्थः.

[14]1M reads हृदयाकाशे.

[15]SM reads सर्वज्ञरूपेण प्रकाशते.

[16]1M omits आत्म°.

दिग्देशकालाद्यनपेक्ष्य[1] सर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित् सर्वगतोऽमृतो भवेत् ॥ ६८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ आत्मबोधः सम्पूर्णः ॥

नन्वात्मज्ञस्यापि ज्ञानप्रतिबन्धकदुरितनिवारणार्थं[2] प्रयागादितीर्थयात्रोद्योगः[3] कर्तव्य इत्याशंक्य स्वात्मतीर्थे[4] स्नातस्य न किञ्चित् कर्तव्यमपीत्याह[5]—'दिग्देशकालादी'ति। यो विनिष्क्रियः परमहंस आत्मतीर्थं[6] भजते स[7] सर्ववित् सर्वज्ञः सर्वत्रगः [8]परमात्मस्वरूपत्वादमृतो मुक्तो भवेत्। कथंभूतं[9] स्वात्मतीर्थं, दिग्देशकालाद्यनपेक्ष्यैव सर्वगतं[10] शीतादिद्वन्द्वदुःखादि[11] हरतीति शीतादिहृत्, नित्यसुखं मोक्षानन्दप्रापकत्वात्, इतरतीर्थेषु तद्विपरीतं द्रष्टव्यम्। तस्मादात्मतीर्थे स्नातस्य न किञ्चिदवशिष्यत इति भावः॥ ६८ ॥

---

इति आत्मबोधटीका सम्पूर्णा[12]

---

[1] 1M reads … द्यनपेक्षः.
[2] 1M reads परिहारार्थं for निवारार्थं.
[3] SM reads यातोद्योगः.
[4] 1M reads स्वात्मतीर्थस्नातस्य.
[5] 1M omits अपि.
[6] 1M reads स्वात्मतोर्थं.
[7] SM omits सः
[8] 1M reads सर्वत्रपरमात्मस्वरूपत्वात्.
[9] 1M reads किंभूतं.
[10] 1M reads सर्वगं.
[11] 1M reads…दुखानि.
[12] 1M reads—इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादपूज्यश्रीमच्छंकराचार्यविरचित-मात्मबोधप्रकरणं सटीकं सम्पूर्णम् ॥

## ERRATA

| Page | Line | For | Read |
|---|---|---|---|
| 1 | 10 | साधनाणि | साधनानि |
| 2 | 13 | कतृत्व | कर्तृत्व |
| 4 | 17 | तद्रुपं | तद्रूपं |
| 5 | 4 | भूतोथ्थं | भूतोत्थं |
| ,, | 7 | ,, | ,, |
| ,, | 11 | रूच्यते | रुच्यते |
| ,, | 12 | ,, | ,, |
| 7 | 8 | जड एव | जडा एव |
| ,, | 15 | …धसन्ति | …ध्यस्यन्ति |
| 8 | 5 | सुसुप्तौ | सुषुप्तौ |
| 11 | 1 | निस्क्रियो | निष्क्रियो |
| 13 | 13 | स्वकन्ठा… | स्वकण्ठा… |
| ,, | 17 | कन्ठ | कण्ठ |
| 15 | 4 | समुद्रं | समुद्रं |
| 16 | 21 | श्रुयन्ते | श्रूयन्ते |

WBGP-62/3-6351F-500